শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

সেৱা শ্রী শ্রীনিৱাসরাঘৱার্য মহাদেশিক ৱিরচিতং

# ॥ শ্রীলক্ষ্মীহযৱদন মঙ্গলম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীলক্ষ্মীহযৱদন মঙ্গলম্ ॥

মণিমণ্ডপিকাস্থানীমণ্ডনায মহীযসে।
মঙ্গলাভরণাযাস্তু তুরগাস্যায মঙ্গলম্॥ **1** ॥

ইন্দিরালিঙ্গনানন্দনিধযে নিধযে সতাম্।
সুন্দরায সুপূর্ণায ৱাজিৱক্ত্রায মঙ্গলম্॥ **2** ॥

ৱিরিঞ্চিমুখদেৱাদিৱেদৱ্যাখ্যানকারিণে।
ৱ্যাখ্যাঙ্কিতকরাযাস্তু ৱাগধীশায মঙ্গলম্॥ **3** ॥

ৱাচি ৱেদশ্রিযং স্বান্তে কৃপাশ্রিযং অপাঙ্গযোঃ।
অনুগ্রহশ্রিযং ধর্ত্রে হযশীর্ষায মঙ্গলম্॥ **4** ॥

প্রপন্নাভযদাযাস্তু দিৱ্যদৃষ্টিপ্রদাযিনে।
দেশিকারাধ্যদৈৱায হযগ্রীৱায মঙ্গলম্॥ **5** ॥

জ্ঞানানন্দসুখারোগ্য ভুক্তিমুক্ত্যাদিদাযিনে।
স্বাশ্রিতায শরণ্যায ৱাগ্ৱরেণ্যায মঙ্গলম্॥ **6** ॥

গোদাশঠারি ভগৱদ্রামানুজমুখৈস্সদা।
দেশিকেন চ যুক্তায নিত্যং ভৱতু মঙ্গলম্॥ **7** ॥

আত্রেযশ্রী শ্রীনিৱাসরাঘৱেণানু সংহিতম্।
শ্রেযো দদাতু পঠতাং শ্রীহযানন মঙ্গলম্॥ **8** ॥

॥ ইতি শ্রীলক্ষ্মীহযৱদন মঙ্গলং সমাপ্তম্ ॥